नं० ११०५-घ

चाणक्यराजनीतिप्रान्तकम् (नीतिशास्त्रम् धर्मशास्त्रान्तर्गतम्)

नं० ११०५-घ

पत्राणि १० (दश) (सम्पूर्णम्)

[illegible]

ॐ चाण
१

ॐ श्रीगणेशाय नमः ॐ नीतिशास्त्रं प्रवक्ष्यामि चाणक्येन तु ।
भाषितं ॥ यस्य श्रवणमात्रेण बुद्धिर्विकाशते नरः ॥१॥ प्रथ
मे नार्जिता विद्या द्वितीये नार्जितं धनं ॥ तृतीये नार्जितो धर्मश्च
तुर्थे किं करिष्यति ॥२॥ कृते वै लिप्यते देशस्त्रेतायां ग्राममेव च
द्वापरे लिप्यते भ्राता कलौ कर्त्तैव लिप्यते ॥३॥ कृते त्वस्थिगताः
प्राणास्त्रेतायां मांसगाश्च च । द्वापरे रुधिरे प्राणाः कलौ चान्नग
ता स्मृता ॥४॥ कृते तु पापं हरेद्देशं त्रेतायां नगरं हरेत ॥ द्वापरे कुलं
संघानं कर्त्तैव लिप्यते ॥५॥ उत्तमं प्राणपानेन मध्यमे भेदनेषा १

येन॥ नीचमल्पप्रदानेन पात्रुं न लप्रकर्मेः॥६॥ उत्तमाः स्वगुणैः ख्या
ताः मध्यमाश्च पितुर्गुणैः॥ अधमाः मातुलैः ख्याताः श्वशुरैश्चा
धमाधमाः॥७॥ तमानुल्यं तयोनास्ति संतोषान्नपरासुखं॥ न च तस्मा
परं व्याधिर्न च धर्मो दयापरः॥८॥ रूपयौवनसंपन्ना विशालकु
संभवाः॥ विद्याहीना न शोभंते निर्गंधा इव किंशुकाः॥९॥ आल
सस्य कुतो विद्या अविद्यस्य कुतो धनं॥ अधनस्य कुतो मित्रं अमि
त्रस्य कुतो बलम्॥१०॥ दुर्बलस्य बलं राजा बालस्य रुदितं बलं॥
बलं मूर्खस्य मौनत्वं तस्करस्यानृतं बलं॥११॥ जितं कृषिभिर्दारि

ना ज २

द्धे गोभिरभ्यागतो जितः ॥ जिताः धनवता हाराः शास्त्रविद्भिर्जितास
भा ॥ १२ ॥ नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः नांतकः
सर्वभूतानां न पुंसां वामलोचना ॥ १३ ॥ कस्य दोषः कुले नास्ति व्याधि
ना को न पीडितः ॥ व्यसनं केन न प्राप्तं कस्य सौख्यं निरंतरम् ॥ १४ ॥ आ
चारः कुलमाख्याति देशमाख्याति भाषितं ॥ संभ्रमः स्नेहमाख्या
ति वपुराख्याति भोजनम् ॥ १५ ॥ सत्कुले योजयेत्कन्यां पुत्रं विद्या
सु योजयेत् ॥ व्यसने योजयेच्छत्रुं मित्रं धर्मे नियोजयेत् ॥ १६ ॥ को
किलानां स्वरो रूपं नारीरूपं पतिव्रता ॥ विद्या रूपं कुरूपाणां त

माहूपेनप्रसिनां॥१७ अतिहूपाद्धितासीताअतिगर्वेणरावणः
७ अतिदानाद्बलिर्बद्धोह्यतिसर्वत्रगर्हितं॥१८ कोतिभारःसमर्थानां
किंदूरंव्यवसायिनां॥कोविदेशःसविद्यानांकःपरःप्रियवादि
नां॥१९॥उद्यमेनास्तिदारिद्र्यंजपतोनास्तिपातकः॥मौनाच्च
कलहानास्तिनास्तिजाग्रतोभयम्॥२०॥एकस्तपोद्विरध्या
यीत्रिभिर्गीतंचतुष्पथे॥कृषिस्पंचभिःकुर्यात्संग्रामेबहवो
जनाः॥२१ साभार्यायाप्रियेष्टयतसाभार्यायापतिव्रता॥सा
भार्यायापतिप्राणाःसाभार्याप्रियवादिना॥२२ अपुत्रस्यगृहं

राज घत्नं हि रणः स्मृत्वा सबांधवैः ॥ न सर्पस्य हृदयं स्मृत्वा सर्वं स्मृत्वा
३ हरिद्विना ॥ १४ ॥ त्यजेत्क्रोधमुखीं भार्यां निस्त्रिहं बांधवं त्यजेत
3 त्यजेत्कपिटिनं मित्रं प्रभुं धनपरायणम् ॥ १५ ॥ अनभ्यासे विषशा
स्त्रमजीर्णे विरवं ॥ विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् १६
अध्वा नराटे हृवनामनन्धावाजिनां जरा ॥ अंतभोगं जस्त्रीणां
संभोगः करिणां जरा ॥ १७ ॥ निःस्पृहो नाधिकारी स्यान्नाकामी मे
डनप्रियः ॥ नविदग्धः प्रियं ब्रूयात स्फुटवक्तौ न वंचिकः ॥ १८
मर्षाणां पैड्तिना हेष्यात्मधनानां महाधनाः ॥ पंचाननाः कु २

लक्ष्मीणां सभगानां चतुर्भेगाः ॥१८ आलस्योपहता विद्याः पर
हस्तहताः स्त्रियः ॥ अल्पतेज हतो राजा हतं सैन्यमनायकं ॥१९
अभ्यासाद्धार्यते विद्या कुलं शीलेन धार्यते ॥ गुणेन मित्राणि धार्ये
ते क्रोधः ज्ञान्या च धार्यते ॥२०॥ वित्तेन रक्ष्यते धर्मो विद्या योगेन
रक्ष्यते ॥ धर्मेण रक्ष्यते भूपः कुलं शीलेन रक्ष्यते ॥२१ मुंडे मुंडे
मतिर्भिन्ना कुंडे कुंडे नवं पयः ॥ जातौ जातौ नवाचारा नवा वाणी
मुखे मुखे २२॥ अन्यथा वेदपांडित्यं शास्त्रमाचारमन्यथा ॥
अन्यथा यत्पदं शान्तं लोकाः क्लिश्यन्ति चान्यथा ॥२३॥ दारिद्र्ना

चा. नी. ४ शनं दानं शीलं दुर्गतिनाशनं ॥ अज्ञाननाशिनी विद्या भावना भाव
नाशिनी ॥ १४ ॥ नास्ति मोहसमो व्याधिर्नास्ति कामसमो रिपुः नास्ति
क्रोधसमो वह्निर्नास्ति ज्ञानात्परं सुखं ॥ १५ जातस्त्वेको म्रतस्त्वे।
5 को भुनक्त्येको शुभाशुभं ॥ नरकेषु पतत्येक एको याति परां ग
तिं ॥ १६ ॥ तृणं ब्रह्मविदः स्वर्गं तृणं शूरस्य जीवितं । जितेंद्रियेत्तृणं
नारी निःस्पृहस्य तृणं जगत् ॥ १७ ॥ विद्या मित्रं प्रवासेषु भार्या मित्रं।
गृहेषु च व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ॥ १८ ॥ वृथा।
वृष्टिः समुद्रेषु वृथा तृप्तेषु भोजनं ॥ वृथा धानं धनाढ्येषु वृथा ४

दीपं दिवाकरे ॥ ७९ ॥ नास्ति चान्नसमं वलं नास्ति वन्हिः समं तेजो
नास्ति धान्यसमं प्रियं ॥ ८० ॥ अधनाः धनमिच्छन्ति वाचं चैव चतुष्प
दाः ॥ मानवाः स्वर्गमिच्छन्ति मोक्षमिच्छन्ति देवताः ॥ ८१ ॥ सत्येन धा
र्यते पृथ्वी सत्येन तपते रविः ॥ सत्येन वायवो वान्ति सर्वं सत्ये प्र
तिष्ठितं ॥ ८२ ॥ चला लक्ष्मीश्चलाः प्राणाश्चले यौवनशैशवे ॥ च
लाचलमिदं संसारो धर्म एको हि निश्चलः ॥ ८३ ॥ श्रुत्वा धर्मं विजा
नाति श्रुत्वा त्यजति दुर्मतिं श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्ष
मवाप्नुयात् ॥ ८४ ॥ नराणां नापितो धूर्तः पक्षिणां चैव वायसः

रा॰ चतुष्पदां खरः ॥ गलस्त्रणाद्वेधर्मो स्वमानिनाः ॥ ७५ ॥ पक्षिणां का।
जे॰ कश्चंडालः पशूनां चैव गर्दभः मुनीनां पश्चंडालः सर्वचंडाल।
५ निंदकः ॥ ७६ भस्मना शुद्ध्यते कांस्यं ताम्रमम्लेन शुद्ध्यति रजसा
शुद्ध्यते नारी नदी वेगेन शुद्ध्यति ॥ ७७ ॥ भ्रमंती पूज्यते वे राभ्रमन्
व पूज्यते द्विजः ॥ भ्रमंत पूज्यते राजा स्त्री भ्रमंती विनश्यति ७८ ।
अस्थिरं गृहमारंभम् अस्थिरं यौवनं धनं ॥ अस्थिरं जीवितं लोके
धर्म कीर्तिर्यशः स्थिरं ॥ ७९ ॥ यस्यार्थस्तस्य मित्राणि यस्यार्थस्त
स्य बांधवाः ॥ यस्यार्थः स पुमांल्लोके यस्यार्थः स च पंडितः ॥ ८० ॥ जाह्नवी

जायतेवृद्धिर्व्यवस्तायोपिनाट्टशाः ॥ सद्धापाल्लाद्दणाज्ञेपापायाहृषी
भवनव्यथा ॥५१॥ कालःपपतिभूतानिकालःसंहरतिप्रजाः ॥
कालस्तमेषुजागर्त्तिनालोहिद्रुरतिक्रमः ॥५२॥ जपश्यतिचज
न्मांधःकामांधोनैवपश्यति ॥ नपश्यतिमदोन्मत्तोह्यर्थीदोषं
नपश्यति ॥५३॥ स्वयंकर्मकरोत्यात्मास्वयंतत्फलमश्नुते ॥ स्वयं
भ्रमतिसंसारेस्वयंतस्माद्विमुच्यते ॥५४॥ राजाराष्ट्रकृतंपापं
राज्ञःपापंपुरोहिते ॥ भर्त्ताःस्त्रीणांकृतंपापंशिष्यपापंगुरुस्
भवेत् ॥५५॥ ऋणकर्त्तापिताशत्रुर्मातानातुव्यभिचारिणीरिपुः ॥ ख्याव

रा० मातारिपुर्भार्यापुत्रोरिपुरपंडितः ॥५६ त्यजेदेकं कुलस्यार्थे ग्रामा
ज० र्थे कुलं त्यजेत ॥ ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥५७ वि
६ षादप्यमृतं ग्राह्यममेध्यादपि कांचनं ॥ नीचादप्युत्तमा विद्या स्त्री
6 रत्नं दुष्कुलादपि ॥५८॥ लुब्धमर्थेन गृह्णीयात् स्तब्धमंजलिकर्मणा ।
मूर्खं छंदानुवृत्त्या च यथार्थत्वेन पंडितम् ॥५९॥ वसंति गोरे वा
ल्पा ग्रामे धर्मा जनाः । ग्रामान्तरेपि शावास्त्र गिरिवासा लसन्ता न
स्ताः ॥६०॥ ज्ञानी यात्वं गते भर्त्या नाथवान्यमनागमे आपत्का
ले पुत्रिणी नारी भार्या च विभव क्षये ॥६१॥ तेषु ज्ञायेपि नर्भकाम ६

पितायस्तुपोषकः॥ तन्मित्रंयत्रविश्वासः साभार्यायापतिव्रता
ता ६२॥ तुष्यन्तिभोजनेविप्रामयूराघनगर्जिते॥ साधवःपरसं
पत्तौखलाःपरविपत्तिषु ६३॥ प्रत्यक्षेगुरवःस्तुत्याःपरोक्षेमि
त्रबांधवाः। कर्मान्तेदासभृत्याश्चनचपुत्राःनचस्त्रियः॥६४॥
शैलेशैलेनमाणिक्यंमौक्तिकंनगजेगजे॥ साधवोनहिसर।
र्वत्रचंदनंनवनेवने॥६५॥ विनयंराजपुत्रेभ्यःपंडितेभ्यःसु
भाषितं॥ अनृतंद्यूतकारिभ्यःस्त्रीभ्यःशिक्षेत्कैतवं ६६॥
अनालोक्यव्ययंकर्त्ताचअनाथोकलहप्रियः॥ आतुरःसर्व

रा॰ नी॰ ७

मह्लीचनरः पीत्वंवनपश्यति॥६०॥अयंनिजपरोवेत्तिगणना

लघुचेतसः॥उदारचरितानांचवसुधैवकुटंबकं॥६८॥सर्वत्र

सुचयोधीरःस्वकर्मनिरताःसदा॥स्वधर्मेचलचित्तास्युस्तेषां

सर्वत्रपिशिकिता॥६९॥नाहंकारंविनयेन्प्राज्ञो॥धर्ममेकंहिचिंत

येत्॥ आहारोहिमनुष्याणांजन्मिनामिहिनापतेः॥७०॥धना

धान्यप्रयोगेषुविद्यानांग्रहणेषुच॥आहारेव्यवहारेचत्यक्तल

ज्जःसदाभवेत्॥७१॥ जलबिंदुनिपातेनक्रमशःपूर्यतेघटः॥सहे नी

तुःसर्वविद्यानांधान्यस्यधनस्यच॥७२॥अनित्यानिशरीराणिवि

भवो नैव शाश्वतः॥ नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः
७३॥ वयसः परिणामोपि यः खलः खल एव सः॥ स्वल्पा पुरपिमा
धुर्यं नो याति इन्द्रवारिनां ७४॥ अवंशपतितो रा———मूर्खोपि
तलन्तः॥ निर्धनेन धनं प्राप्तं तृणवन्मन्यते जगत्॥ ७५ मदर्दम
पि जीवेन नरः शुक्लेन कर्मणा॥ न कल्पमपि कष्टेन लोकद्वयवि
रोधिना ७६॥ यस्मिन्रुष्टे भयं नास्ति तुष्टे नैव धनागमः॥ निग्रहा
नुग्रहो नास्ति स रुष्टः किं करिष्यति ७७॥ गते शोको न कर्तव्यो (
नविष्यं नैव चिंतयेत्॥ वर्त्तमानेन कालेन वर्त्तन्ति विचक्षणाः ७८

चा॰ स्वभावेन हि तुष्यंति देवाः सत्पुरुषाः पिता || ज्ञातयः स्नानपानेन वा
नी॰ क — नेन पंडिताः ||७९|| क्षमाखड्गकरे यस्य दुर्जनः किं करिष्यति
८ अतृणे पतितो वह्निः स्वयमेव प्रशाम्यति ||८०|| आयुः कर्म च वित्तं
४ च विद्या निधनमेव हि || पंचैतानि हि सृज्यंते गर्भस्थस्यैव देहिनः
८१|| अहो बत विचित्राणि चरितानि महात्मनां || लक्ष्मीस्तृणाय
मन्यंते भारेण नमंति ||८२|| यत्र स्नेहं भयं तत्र स्नेहो दुःखस्य भाजनं स्ने
ह मूलानि दुःखानि तानि त्यक्त्वा परमं सुखं ||८३|| अनागतविधाता
च प्रत्युत्पन्नमतिस्तथा || द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ८
८६

धर्मार्थकाममोक्षाणां यस्यैकोपि न विद्यते ॥ अजागलस्तनस्ये
व तस्य जन्म निरर्थकम् ॥ ८५ ॥ जीवन्तम्मृतवन्मन्ये देहिनं धर्मव
र्जितं ॥ मृतो पि धर्मणा युक्तो दीर्घजीवी न नस्यति ८६ ॥ देहमा
नुहन्तोब्रेण नीचापररूपेणाग्निना ॥ अप्राकृतस्य पदं गंतं न ता
निदं प्रकुर्वते ॥ ८७ ॥ राज्ञि धर्मणि धर्मिष्ठाः पापे पापाः समे समाः
राजानमनुवर्त्तन्ते यथा राजा तथा प्रजाः ॥ ८८ ॥ बंधाय विषयासं
गं मुक्त्यैव निर्विषयं गतं ॥ मन एव मनुष्याणां कारणं बंधमो
क्षयो ८९ ॥ देहाभिमाने गलिते विज्ञाते परमात्मनि ॥ यत्र यत्र

गा॰ जै॰ ५ मनो याति तत्र तत्र समाधिमान् ॥ ५० ॥ नैव पश्यति न विज्ञस्यन
ज्ञानेन वनेत् तिः ॥ जनो दृश्यति सेगान नवते संग स्वविवर्जितः ॥ ५१
॥ स्वभावो नोपदेशेन न शास्त्रैः कर्त्तुमन्यथा ॥ सुवर्णमानीहृतो
न. पानि पुनर्गच्छति सीततां ॥ ५२ ॥ यथा खनन्खनित्रेण भूतले
वारि विंदति ॥ तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ ५३ ॥ पं
च यत्र न विद्यंते न कुर्यात्तत्र संगतिं ॥ लोकयात्रा भयं लज्जा दाक्षि
ण्यं धर्मशीलिता ॥ ५४ ॥ उद्यमं साहसं धैर्यं बलं बुद्धिपराक्रमं ॥ ष
ड्डेते यत्र तिष्ठंति तस्माद्देवोपि शंकते ॥ ५५ ॥ ततो धास्त्रिषु कर्त्तव्यो नी ५

स्वमातो भोजने पथि॥ त्रिषु चैव न कर्त्तव्यो दाने तपसि चव्यये।
पृष्ठ॥ सर्वपापारंभ नेकार्यमेकचित्तेन भाषते॥ एकचित्तं भवेत्कार्यं
विना चित्तेन विष्णु पद्मनि॥९७॥ एकाकादश्यां दत्तारां योगसोनाभिम
न्यति॥ स्थानानि पोनि पातं गत्वा चांडालेष्वपि जायते॥९८॥ दुर्ल
भो मानुषो देहो देहिनां क्षणभंगुरः॥ तत्रापि दुर्लभं मन्ये।
वैकुंठप्रियदर्शनः॥९९॥ ग्रणांते चलिति मेरुः कल्पांते सप्त
सागराः। साधवः प्रतिपन्नार्थी न चलंति कदाचिन॥१००॥ संसा
रकटकवृक्षस्य द्वे फले अमृतोपमे॥ सुभाषितरसस्वादुसं।

रा॰ नी॰ १० गमसंज्ञैः सह ॥१०१॥ इति श्रीराजनीतिपानकं समाप्तम्
शुभमस्तु ॥ ॥ ॥ ॥ ॥ ॥